# Shridharatirtha Stuti

# श्रीधरतीर्थस्तुतिः

## Document Information

Text title : Shridharatirtha Stuti

File name : shrIdharatIrthastutiH.itx

Category : deities_misc, gurudev, shrIdharasvAmI, stuti

Location : doc_deities_misc

Author : bhaginI netrAvatI

Proofread by : Paresh Panditrao

Description/comments : shrIdharasvAmI stotrANi. shrIdharasandeshaH

Latest update : January 14, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

January 15, 2023

*sanskritdocuments.org*

# श्रीधरतीर्थस्तुतिः

(इन्द्रवज्रावृत्तम्)
आद्यन्त कार्यालय दिव्य तीर्थं
श्रीधर्मतेजोवल बुद्धितीर्थम् ।
सिद्धिर्गणानां गुणशान्तितीर्थं
श्रीदं च तीर्थं शरणं प्रपद्ये ॥ १॥

सर्वान्तरस्थानमनन्त तीर्थं
सर्वेन्द्रियालकृत गुह्यतीर्थम् ।
स्वानन्दशोभाङ्कुर हार्दतीर्थं
गुरुपादतीर्थं शरणं प्रपद्ये ॥ २॥

श्रीरामवाणीप्रिय भाग्यतीर्थं
श्रीरामसीताऽर्चन तोष तीर्थम् ।
श्रीराजरामाश्रित जीव (प्राण) तीर्थं
श्रीदं च तीर्थं शरणं प्रपद्ये ॥ ३॥

कारुण्यरूपान्तर स्वामितीर्थं
श्रीश्रीधराख्यामृतहस्ततीर्थम् ।
साक्षादगस्त्याश्रम भद्रतीर्थं
वरदाप्रवाहं शरणं प्रपद्ये ॥ ४॥

याऽणोरणीयान्तर देवकन्या
यालिङ्गिता गीतवतिप्रसन्ना ।
या राष्ट्रस्वर्गे परिणीत मान्या
तीर्थाङ्गना साध्विपदं प्रपद्ये ॥ ५॥

याऽरण्यमध्ये सरितासुवारि
या ब्रह्मसूत्रे सुविवाद वारि ।
या जन्मसन्तारयतीति वारि

सा मातृसाध्वीं शरणं प्रपद्ये ॥ ६॥

या मेधया निसृत कर्ण वारि
कार्यस्य सञ्चालिनि चित्तवारि ।
प्राक्जन्मपुण्यं फलदर्श वारि
मातुश्च साध्वीं शरणं प्रपद्ये ॥ ७॥

श्रीपादमूले श्रुतिकोकिलाख्ये
वाक्प्राणसङ्के यतिराज शेखरे ।
झङ्कारभागे ओङ्कारमन्त्रं
श्रीदं च तीर्थं शरणं प्रपद्ये ॥ ८॥

सच्चित्कलाश्री सरसा सुशब्दं
विद्यार्थवारी भुवि पद्म निसृतम् ।
अध्यात्मनिष्ठात् गन्तव्यमार्गं
वरदां पुराणीं शरणं प्रपद्ये ॥ ९॥

सच्चित्प्रभां श्रीं प्रणवस्वरूपां
मृत्युजयालङ्कृत पार्वतीं ताम् ।
आत्मार्थसिध्यैः रिद्रस्यवज्रा
वृत्तेन तीर्थं शरणं प्रपद्ये ॥ १०॥

या काव्यलक्ष्मी जगति प्रसिद्धा
या सा कला विष्णु, शिवा च ब्रह्मा ।
या स्वर्गभूमी जय सज्जनाङ्गाः
सा तीर्थसाध्वीं शरणं प्रपद्ये ॥ ११॥

सर्वार्थदात्रीं जय तीर्थलक्ष्मीं
कैलासतोषाङ्कुर जीवलक्ष्मीम् ।
त्रयोदशाख्यावलि पूर्णलक्ष्मीं
क्षेत्रं सुपूज्यां शरणं प्रपद्ये ॥ १२॥

श्रीरामनामान्तर यज्ञतीर्थं
स्वीकृत्य च क्षः करणादि कार्यम् ।
श्रीपादराजार्पणमस्तु नित्यं
सर्वान् सतः श्रोचिरचित्रमीडे ॥ १३॥

इति भगिनी नेत्रावती विरचिता श्रीधरतीर्थस्तुतिः समाप्ता ।

(परमानन्द मठ, शीगेहळ्ळी,
ता. शिरसी (उ. का.))

Proofread by Paresh Panditrao

*Shridharatirtha Stuti*

pdf was typeset on January 15, 2023

Please send corrections to *sanskrit@cheerful.com*